ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः, ह॒रि॒: ओं

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता पद पाठः

## (वाक्य सहित)

# चतुर्थकाण्डे तृतीयः प्रश्नः

**Notes:**

1. **Please refer to the book "TS Kandam 1" and "TS 1.1 pada paadam with Vaakyam" for notes and conventions used in this Compilation.**
2. **Please download our vedic compilations from our web site www.vedavms.in**

**Version 1.0** **December 31, 2020**

## Version Notes:

**This is now the current Version 1.0 dated December 31, 2020.**

1. This replaces the earlier version 0.0 dated August 31, 2019.

2. This version has been updated with the errors found and reported till December 31, 2020.

3. Required convention, style and presentation improvements or standardisations has been done whereever applicable.

4. Notify your corrections / suggestions etc to our email id vedavms@gmail.com

## Earlier Versions

| | | |
|---|---|---|
| 1st | Version Number | 0.0 dated 31st January 2019 |
| 2nd | Version Number | 0.0 dated 31st August 2019 |

# Table of Contents

4 कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां पद पाठे चतुर्थं काण्डं 4

4.3 चतुर्थकाण्डे तृतीयः प्रश्नः – चितिवर्णनं............................4

ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः , हरिः ओं

# 4 कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां पद पाठे

# चतुर्थं काण्डं

## 4.3 चतुर्थकाण्डे तृतीयः प्रश्नः – चितिवर्णनं

**TS 4.3.1.1**

अपां त्वेमन्थ् सादयाम्यपां त्वोद्मन्थ् सादयाम्यपां त्वा भस्मन्थ्

सादयाम्यपां त्वा ज्योतिषि सादयाम्यपां त्वाऽयने सादयाम्यर्णवे सदने

सीद समुद्रे सदने सीद सलिले सदने सीदापां क्षये सीदापा॑ं

सधिषि सीदापां त्वा सदने सादयाम्यपां त्वा सधस्थे सादयाम्यपां

त्वा पुरीषे सादयाम्यपां त्वा योनौ ( ) सादयाम्यपां त्वा पाथसि

सादयामि गायत्री छन्द–स्त्रिष्टुप् छन्दो जगती छन्दोऽनुष्टुप् छन्दः

पङ्क्ति श्छन्दः ॥ 1

**TS 4.3.1.1 - Padam**

अपाम् । त्वा । एमन्न् । सादयामि । अपाम् । त्वा । ओद्मन्न् ।

सादयामि । अपाम् । त्वा । भस्मन्न् । सादयामि । अपाम् । त्वा ।

ज्योतिषि । सादयामि । अपाम् । त्वा । अयने । सादयामि । अर्णवे ।
सदने । सीद । समुद्रे । सदने । सीद । सलिले । सदने । सीद ।
अपाम् । क्षये । सीद । अपाम् । सधिषि । सीद । अपाम् । त्वा ।
सदने । सादयामि । अपाम् । त्वा । सधस्थ इति सध – स्थे ।
सादयामि । अपाम् । त्वा । पुरीषे । सादयामि । अपाम् । त्वा ।
योनौ ( ) । सादयामि । अपाम् । त्वा । पाथसि । सादयामि ।
गायत्री । छन्दः । त्रिष्टुप् । छन्दः । जगती । छन्दः ।
अनुष्टुबित्यनु – स्तुप् । छन्दः । पङ्क्तिः । छन्दः ॥ **1 (65)**

*(योनौ – पञ्चदश च) (A1)*

**TS 4.3.2.1**

अयं पुरो भुवस्तस्य प्राणो भौवायनो वसन्तः प्राणायनो गायत्री
वासन्ती गायत्रियै गायत्रं गायत्रा–दुपा॒ꣳशुरुपा॒ꣳशो–स्त्रिवृत् त्रिवृतो
रथन्तर॒ꣳ रथन्तराद्–वसिष्ठ ऋषिः प्रजापतिगृहीतया त्वया प्राणं
गृह्णामि प्रजाभ्योऽयं दक्षिणा विश्वकर्मा तस्य मनो वैश्वकर्मणं ग्रीष्मो
मानसस्त्रिष्टुग् ग्रैष्मी त्रिष्टुभ ऐडमैडा–दन्तर्यामो ऽन्तर्यामात्

पञ्चदशः पञ्चदशाद्–बृहद्–बृहतो भरद्वाज ऋषिः
प्रजापतिगृहीतया त्वया मनो – [ ] 2

**TS 4.3.2.1 - Padam**

अयम् । पुरः । भुवः । तस्य । प्राण इति प्र – अनः । भौवायनः ।
वसन्तः । प्राणायनः । गायत्री । वासन्ती । गायत्रियै । गायत्रम् ।
गायत्रात् । उपा॒ꣳशुरित्युप – अꣳशुः । उपा॒ꣳशोरित्युप–अꣳशोः ।
त्रिवृदिति त्रि – वृत् । त्रिवृत इति त्रि – वृतः । रथन्तरमिति
रथं – तरम् । रथन्तरादिति रथं – तरात् । वसिष्ठः । ऋषिः ।
प्रजापतिगृहीतयेति प्रजापति – गृहीतया । त्वया । प्राणमिति
प्र – अनम् । गृह्णामि । प्रजाभ्य इति प्र – जाभ्यः । अयम् ।
दक्षिणा । विश्वकर्मेति विश्व – कर्मा । तस्य । मनः ।
वैश्वकर्मणमिति वैश्व – कर्मणम् । ग्रीष्मः । मानसः । त्रिष्टुक् ।
ग्रैष्मी । त्रिष्टुभः । ऐडम् । ऐडात् । अन्तर्याम इत्यन्तः – यामः ।
अन्तर्यामादित्यन्तः – यामात् । पञ्चदश इति पञ्च – दशः ।

पञ्चदशादिति पञ्च–दशात् । बृहत् । बृहतः । भरद्वाजः । ऋषिः ।
प्रजापतिगृहीतयेति प्रजापति – गृहीतया । त्वया । मनः । **2 (50)**

**TS 4.3.2.2**

गृह्णामि प्रजाभ्योऽयं पश्चाद्–विश्वव्यचास्तस्य चक्षुर्वैश्वव्यचसं वर्.षाणि चाक्षुषाणि जगती वार्.षी जगत्या ऋक्षम–मृक्षमा–च्छुक्रः शुक्राथ् सप्तदशः सप्तदशाद् वैरूपं ँवैरूपाद् विश्वामित्र ऋषिः प्रजापतिगृहीतया त्वया चक्षुर्गृह्णामि प्रजाभ्य इदमुत्तराथ् सुवस्तस्य श्रोत्रꣳ सौवꣳ शर–च्छ्रौत्र्यनुष्टुप्–छारद्यनुष्टुभः स्वारꣳ स्वारान्मन्थी मन्थिन एकविꣳश एकविꣳशाद् वैराजं ँवैराजाज्जमदग्निर्. ऋषिः प्रजापतिगृहीतया – [ ] **3**

**TS 4.3.2.2 - Padam**

गृह्णामि । प्रजाभ्य इति प्र – जाभ्यः । अयम् । पश्चात् ।
विश्वव्यचा इति विश्व – व्यचाः । तस्य । चक्षुः ।
वैश्वव्यचसमिति वैश्व – व्यचसम् । वर्.षाणि । चाक्षुषाणि ।
जगती । वार्.षी । जगत्याः । ऋक्षमम् । ऋक्षमात् । शुक्रः ।

शुक्रात् । सप्तदश इति सप्त – दशः ।

सप्तदशादिति सप्त–दशात् । वैरूपम् । वैरूपात् । विश्वामित्र इति

विश्व – मित्रः । ऋषिः । प्रजापतिगृहीतयेति प्रजापति – गृहीतया ।

त्वया । चक्षुः । गृह्णामि । प्रजाभ्य इति प्र – जाभ्यः । इदम् ।

उत्तरादित्युत् – तरात् । सुवः । तस्य । श्रोत्रम् । सौवम् । शरत् ।

श्रौत्री । अनुष्टुबित्यनु – स्तुप् । शारदी । अनुष्टुभ इत्यनु – स्तुभः ।

स्वारम् । स्वारात् । मन्थी । मन्थिनः । एकवि॒ꣳश इत्येक – वि॒ꣳशः ।

एकवि॒ꣳशादित्येक – वि॒ꣳशात् । वैराजम् । वैराजात् । जमदग्निः ।

ऋषिः । प्रजापतिगृहीतयेति प्रजापति – गृहीतया । **3 (50)**

**<u>TS 4.3.2.3</u>**

त्वया श्रोत्रं गृह्णामि प्रजाभ्य इयमुपरि मतिस्तस्यै वाङ् माती हेमन्तो

वाच्यायनः पङ्क्ति॒र्.हैमन्ती पंक्त्यै निधनवन्निधनवत आग्रयण

आग्रयणात् त्रिणवत्रयस्त्रि॒ꣳशौ त्रिणवत्रयस्त्रि॒ꣳशाभ्या॒ꣳ शाक्वररैवते

शाक्वररैवताभ्यां ँविश्वकर्मर्.षिः प्रजापतिगृहीतया त्वया वाचं गृह्णामि

प्रजाभ्यः ॥ 4

**TS 4.3.2.3 - Padam**

त्वया । श्रोत्रम् । गृह्णामि । प्रजाभ्य इति प्र–जाभ्यः । इयम् ।

उपरि । मतिः । तस्यै । वाक् । माती । हेमन्तः । वाच्यायनः ।

पङ्क्तिः । हैमन्ती । पङ्क्त्यै । निधनवदिति निधन – वत् ।

निधनवत इति निधन – वतः । आग्रयणः । आग्रयणात् ।

त्रिणवत्रयस्त्रि॒ꣳशाविति त्रिणव – त्रयस्त्रि॒ꣳशौ ।

त्रिणवत्रयस्त्रि॒ꣳशाभ्यामिति त्रिणव – त्रयस्त्रि॒ꣳशाभ्याम् ।

शाक्वररैवते इति शाक्वर – रैवते ।

शाक्वररैवताभ्यामिति शाक्वर – रैवताभ्याम् ।

विश्वकर्मेति विश्व – कर्मा । ऋषिः ।

प्रजापतिगृहीतयेति प्रजापति – गृहीतया । त्वया । वाचम् । गृह्णामि ।

प्रजाभ्य इति प्र – जाभ्यः ॥ **4 (30)**

*(त्वया मनो–जमदग्निर्. ऋषिः प्रजापतिगृहीतया–त्रि॒ꣳशच्च) (A2)*

**TS 4.3.3.1**

प्राची दिशां वँसन्त ऋतूनामग्निर्देवता ब्रह्म द्रविणं त्रिवृथ् स्तोमः
स उ पञ्चदशवर्तनि–स्त्र्यविर्वयः कृतमयानां पुरोवातो वातः सानग
ऋषिर्दक्षिणा दिशां ग्रीष्म ऋतूनामिन्द्रो देवता क्षत्रं द्रविणं पञ्चदशः
स्तोमः स उ सप्तदशवर्तनि–र्दित्यवाड्–वयस्त्रेताऽयानां दक्षिणाद्वातो
वातः सनातन ऋषिः प्रतीची दिशां वँर्.षा ऋतूनां वँिश्वे
देवा देवता विड्–[ ] **5**

**TS 4.3.3.1 - Padam**

प्राची । दिशाम् । वसन्तः । ऋतूनाम् । अग्निः । देवता । ब्रह्म ।
द्रविणम् । त्रिवृदिति त्रि – वृत् । स्तोमः । सः । उ ।
पञ्चदशवर्तनिरिति पञ्चदश – वर्तनिः । त्र्यविरिति त्रि – अविः ।
वयः । कृतम् । अयानाम् । पुरोवात इति पुरः – वातः । वातः ।
सानगः । ऋषिः । दक्षिणा । दिशाम् । ग्रीष्मः । ऋतूनाम् । इन्द्रः ।
देवता । क्षत्रम् । द्रविणम् । पञ्चदश इति पञ्च – दशः । स्तोमः ।
सः । उ । सप्तदशवर्तनिरिति सप्तदश – वर्तनिः ।
दित्यवाडिति दित्य – वाट् । वयः । त्रेता । अयानाम् ।

दक्षिणाद्वात इति दक्षिणात् – वातः । वातः ।

सनातन इति सना – तनः । ऋषिः । प्रतीची । दिशाम् । वर्.षाः ।

ऋतूनाम् । विश्वे । देवाः । देवता । विट् । **5 (50)**

**TS 4.3.3.2**

द्रविण९ं सप्तदश स्तोमः स उ–वेकवि९ंशवर्तनि–स्त्रिवथ्सो

वयो द्वापरोऽयानां पश्चाद्वातो वातोऽहभून ऋषिरुदीची दिशा९ं

शरद्–ऋतूनां मित्रावरुणौ देवता पुष्टं द्रविणमेकवि९ंशः स्तोमः स

उ त्रिणववर्तनि–स्तुर्यवाड् वय आस्कन्दो ऽयाना–मुत्तराद्–वातो वातः

प्रत्न ऋषिरूर्द्ध्वा दिशा९ं हेमन्तशिशिरावृतूनां बृहस्पतिर्देवता वर्चो

द्रविणं त्रिणव स्तोमः स उ त्रयस्त्रि९ंशवर्तनिः पष्ठवाद्वयो ( )

ऽभिभूरयानां ँविष्वग्वातो वातः सुपर्ण ऋषिः पितरः पितामहाः परेऽवरे

ते नः पान्तु ते नोऽवन्त्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेऽस्या–माशिष्यस्यां

पुरोधायामस्मिन् कर्मन्नस्यां देवहूत्यां ॥ **6**

**TS 4.3.3.2 - Padam**

द्रविणम् । सप्तदश इति सप्त - दशः । स्तोमः । सः । उ ।

एकवि॒ꣳशवर्तनिरित्येकवि॒ꣳश - वर्तनिः । त्रिवथ्स इति त्रि-वथ्सः ।

वयः । द्वापरः । अयानाम् । पश्चाद्वात इति पश्चात्-वातः । वातः ।

अहभूनः । ऋषिः । उदीची । दिशाम् । शरत् । ऋतूनाम् ।

मित्रावरुणाविति मित्रा - वरुणौ । देवता । पुष्टम् । द्रविणम् ।

एकवि॒ꣳश इत्येक - वि॒ꣳशः । स्तोमः । सः । उ ।

त्रिणववर्तनिरिति त्रिणव - वर्तनिः । तुर्यवाडिति तुर्य - वाट् ।

वयः । आस्कन्द इत्या - स्कन्दः । अयानाम् । उत्तराद्वात

इत्युत्तरात् - वातः । वातः । प्रत्नः । ऋषिः । ऊर्द्ध्वा । दिशाम् ।

हेमन्तशिशिराविति हेमन्त - शिशिरौ । ऋतूनाम् । बृहस्पतिः ।

देवता । वर्चः । द्रविणम् । त्रिणव इति त्रि - नवः । स्तोमः । सः ।

उ । त्रयस्त्रि॒ꣳशवर्तनिरिति त्रयस्त्रि॒ꣳश - वर्तनिः । पष्ठवादिति

पष्ठ - वात् । वयः ( ) । अभिभूरित्यभि - भूः । अयानाम् ।

विष्वग्वात इति विष्वक् - वातः । वातः । सुपर्ण इति सु - पर्णः ।

ऋषिः । पितरः । पितामहाः । परे । अवरे । ते । नः । पान्तु । ते ।

नः । अवन्तु । अस्मिन्न् । ब्रह्मन्न् । अस्मिन्न् । क्षत्रे । अस्याम् ।

आशिषीत्या – शिषि । अस्याम् । पुरोधायामिति पुरः – धायाम् ।

अस्मिन्न् । कर्मन्न् । अस्याम् । देवहूत्यामिति देव–हूत्याम् ॥ **6 (78)**

*(विट् – पष्ठवाद् वयो – ऽष्टाविꣳशतिश्च) (A3)*

**TS 4.3.4.1**

ध्रुवक्षिति –र्ध्रुवयोनि–र्ध्रुवाऽसि ध्रुवां ँयोनिमा सीद साद्ध्या ।

उख्यस्य केतुं प्रथमं पुरस्तादश्विना ऽद्ध्वर्यू सादयतामिह त्वा ॥

स्वे दक्षे दक्षपितेह सीद देवत्रा पृथिवी बृहती रराणा ।

स्वासस्था तनुवा सं ँविशस्व पितेवैधि सूनव आ

सुशेवा ऽश्विना ऽद्ध्वर्यू सादयतामिह त्वा ॥

कुलायिनी वसुमती वयोधा रयिं नो वर्द्ध बहुलꣳ सुवीरं । **7**

**TS 4.3.4.1 - Padam**

ध्रुवक्षितीरिति ध्रुव – क्षितिः । ध्रुवयोनिरिति ध्रुव–योनिः । ध्रुवा ।

असि । ध्रुवाम् । योनिम् । एति । सीद । साद्ध्या ॥ उख्यस्य ।

केतुम् । प्रथमम् । पुरस्तात् । अश्विना । अद्ध्वर्यू इति । सादयताम् ।
इह । त्वा ॥ स्वे । दक्षे । दक्षपितेति दक्ष – पिता । इह । सीद ।
देवत्रेति देव – त्रा । पृथिवी । बृहती । रराणा ॥ स्वासस्थेति
सु – आसस्था । तनुवा । समिति । विशास्व । पिता । इव । एधि ।
सूनवे । एति । सुशेवेति सु – शेवा । अश्विना । अद्ध्वर्यू इति ।
सादयताम् । इह । त्वा ॥ कुलायिनी । वसुमतीति वसु – मती ।
वयोधा इति वयः – धाः । रयिम् । नः । वर्द्ध । बहुलम् ।
सुवीरमिति सु – वीरम् ॥ **7 (50)**

**TS 4.3.4.2**

अपामतिं दुर्मतिं बाधमाना रायस्पोषे यज्ञपतिमाभजन्ती सुवर्द्धेहि
यजमानाय पोषमश्विना ऽद्ध्वर्यू सादयतामिह त्वा ॥
अग्नेः पुरीषमसि देवयानी तां त्वा विश्वे अभि गृणन्तु देवाः ।
स्तोमपृष्ठा घृतवतीह सीद प्रजावदस्मे द्रविणा ऽऽ*यजस्वाश्विना
ऽद्ध्वर्यू सादयतामिह त्वा ॥
दिवो मूर्द्धाऽसि पृथिव्या नाभिर्विष्टंभनी दिशामधिपत्नी भुवनानां । **8**

**TS 4.3.4.2 - Padam**

अपेति । अमतिम् । दुर्मतिमिति दुः – मतिम् । बाधमाना । रायः ।
पोषे । यज्ञपतिमिति यज्ञ – पतिम् । आभजन्तीत्या – भजन्ती ।
सुवः । धेहि । यजमानाय । पोषम् । अश्विना । अद्ध्वर्यू इति ।
सादयताम् । इह । त्वा ॥ अग्नेः । पुरीषम् । असि । देवयानीति
देव – यानी । ताम् । त्वा । विश्वे । अभीति । गृणन्तु । देवाः ॥
स्तोमपृष्ठेति स्तोम – पृष्ठा । घृतवतीति घृत – वती । इह । सीद ।
प्रजावदिति प्रजा – वत् । अस्मे इति । द्रविणा । एति । यजस्व ।
अश्विना । अद्ध्वर्यू इति । सादयताम् । इह । त्वा ॥ दिवः ।
मूर्द्धा । असि । पृथिव्याः । नाभिः । विष्टंभनीति वि – स्तंभनी ।
दिशाम् । अधिपत्नीत्यधि – पत्नी । भुवनानाम् ॥ **8 (50)**

**TS 4.3.4.3**

ऊर्मिर्द्रफ्सो अपामसि विश्वकर्मा त ऋषिरश्विना ऽद्ध्वर्यू
सादयतामिह त्वा ॥

सजूर्.ऋतुभिः सजूर्विधाभिः सजूर्वसुभिः सजू रुद्रैः सजूरादित्यैः
सजूर्विश्वैर्देवैः सजूर्देवैः सजूर्देवैर्वयोनाधै–रग्नये त्वा
वैश्वानरायाश्विना ऽद्ध्वर्यू सादयतामिह त्वा ॥
प्राणं मे पाह्यपानं मे पाहि व्यानं मे पाहि चक्षुर्म उर्व्या ( ) वि भाहि
श्रोत्रं मे श्लोकयाप–स्पिन्वौषधीर्जिन्व द्विपात् पाहि चतुष्पादव दिवो
वृष्टिमेरय ॥ **9**

**TS 4.3.4.3 - Padam**

ऊर्मिः । द्रप्सः । अपाम् । असि । विश्वकर्मेति विश्व – कर्मा । ते ।
ऋषिः । अश्विना । अद्ध्वर्यू इति । सादयताम् । इह । त्वा ॥
सजूरिति स – जूः । ऋतुभिरित्यृतु – भिः । सजूरिति स – जूः ।
विधाभिरिति वि–धाभिः । सजूरिति स–जूः । वसुभिरिति वसु–भिः ।
सजूरिति स – जूः । रुद्रैः । सजूरिति स – जूः । आदित्यैः ।
सजूरिति स – जूः । विश्वैः । देवैः । सजूरिति स – जूः । देवैः ।
सजूरिति स – जूः । देवैः । वयोनाधैरिति वयः – नाधैः । अग्नये ।
त्वा । वैश्वानराय । अश्विना । अद्ध्वर्यू इति । सादयताम् । इह ।

त्वा ॥ प्राणमिति प्र – अनम् । मे । पाहि । अपानमित्यप – अनम् ।
मे । पाहि । व्यानमिति वि–अनम् । मे । पाहि । चक्षुः । मे ।
उर्व्या ( ) । वीति । भाहि । श्रोत्रम् । मे । श्लोकय । अपः । पिन्व ।
ओषधीः । जिन्व । द्विपादिति द्वि – पात् । पाहि । चतुष्पादिति
चतुः – पात् । अव । दिवः । वृष्टिम् । एति । ईरय ॥ **9 (67)**

***(सुवीरं – भुवनाना – मुर्व्या – सप्तदश च) (A4)***

**TS 4.3.5.1**

त्र्यविर्वय–स्त्रिष्टुप् छन्दो दित्यवाड् वयो विराट् छन्दः पञ्चाविर्वयो
गायत्री छन्दस्त्रिवथ्सो वय उष्णिहा छन्द स्तुर्यवाड् वयोऽनुष्टुप्
छन्दः पष्ठवाद् वयो बृहती छन्द उक्षा वयः सतोबृहती छन्द ऋषभो
वयः ककुच्छन्दो धेनुर्वयो जगती छन्दोऽनड्वान्. वयः पङ्क्ति श्छन्दो
बस्तो वयो विवलं छन्दो वृष्णिर्वयो विशालं छन्दः पुरुषो वय ( )
स्तन्द्रं छन्दो व्याघ्रो वयोऽनाधृष्टं छन्दः सि~ँहो वय श्छदि श्छन्दो
विष्टंभो वयोऽधिपति श्छन्दः क्षत्रं वयो मयन्दं छन्दो विश्वकर्मा
वयः परमेष्ठी छन्दो मूर्द्धा वयः प्रजापति श्छन्दः ॥ **10**

**TS 4.3.5.1 - Padam**

त्र्यविरिति त्रि – अविः । वयः । त्रिष्टुप् । छन्दः । दित्यवाडिति

दित्य – वाट् । वयः । विराडिति वि – राट् । छन्दः । पञ्चाविरिति

पञ्च–अविः । वयः । गायत्री । छन्दः । त्रिवथ्स इति त्रि – वथ्सः ।

वयः । उष्णिहा । छन्दः । तुर्यवाडिति तुर्य – वाट् । वयः ।

अनुष्टुबित्यनु – स्तुप् । छन्दः । पष्ठवादिति पष्ठ – वात् । वयः ।

बृहती । छन्दः । उक्षा । वयः । सतोबृहतीति सतः – बृहती ।

छन्दः । ऋषभः । वयः । ककुत् । छन्दः । धेनुः । वयः । जगती ।

छन्दः । अनड्वान् । वयः । पङ्क्तिः । छन्दः । बस्तः । वयः ।

विवलमिति वि – वलम् । छन्दः । वृष्णिः । वयः । विशालमिति

वि–शालम् । छन्दः । पुरुषः । वयः ( ) । तन्द्रम् । छन्दः । व्याघ्रः ।

वयः । अनाधृष्टमित्यना – धृष्टम् । छन्दः । सिꣳहः । वयः । छदिः ।

छन्दः । विष्टंभ इति वि – स्तंभः । वयः । अधिपतिरित्यधि–पतिः ।

छन्दः । क्षत्रम् । वयः । मयन्दम् । छन्दः । विश्वकर्मेति

विश्व – कर्मा । वयः । परमेष्ठी । छन्दः । मूर्द्धा । वयः ।

प्रजापतिरिति प्रजा – पतिः । छन्दः ॥ **10 (76)**

*(पुरुषो वयः – षड्वि॑ꣳशतिश्च) (A5)*

**TS 4.3.6.1**

इन्द्राग्नी अव्यथमाना–मिष्टकां दृꣳहतं यँुवं ।

पृष्ठेन द्यावापृथिवी अन्तरिक्षं च वि बाधतां ॥

विश्वकर्मा त्वा सादयत्वन्तरिक्षस्य पृष्ठे व्यचस्वतीं प्रथस्वतीं

भास्वतीꣳ सूरिमतीमा या द्यां भास्या पृथिवीमोर्वन्तरिक्ष–मन्तरिक्षं

यँच्छान्तरिक्षं दृꣳहान्तरिक्षं मा हिꣳसी र्विश्वस्मै प्राणायापानाय

व्यानायोदानाय प्रतिष्ठायै चरित्राय वायुस्त्वाऽभि पातु मह्या स्वस्त्या

छर्दिषा – [ ] **11**

**TS 4.3.6.1 - Padam**

इन्द्राग्नी इतीन्द्र – अग्नी । अव्यथमानाम् । इष्टकाम् । दृꣳहतम् ।

युवम् ॥ पृष्ठेन । द्यावापृथिवी इति द्यावा–पृथिवी । अन्तरिक्षम् । च ।

वीति । बाधताम् ॥ विश्वकर्मेति विश्व – कर्मा । त्वा । सादयतु ।

अन्तरिक्षस्य । पृष्ठे । व्यचस्वतीम् । प्रथस्वतीम् । भास्वतीम् ।

सूरिमतीमिति सूरि – मतीम् । एति । या । द्याम् । भासि । एति ।
पृथिवीम् । एति । उरु । अन्तरिक्षम् । अन्तरिक्षम् । यच्छ ।
अन्तरिक्षम् । दृ७्ह । अन्तरिक्षम् । मा । हि७्सीः । विश्वस्मै ।
प्राणायेति प्रा – अनाय । अपानायेत्यप – अनाय । व्यानायेति
वि – अनाय । उदानायेत्युत् – अनाय । प्रतिष्ठाया इति
प्रति – स्थायै । चरित्राय । वायुः । त्वा । अभीति । पातु । मह्या ।
स्वस्त्या । छर्दिषा । **11 (50)**

**<u>TS 4.3.6.2</u>**

शन्तमेन तया देवतयाऽङ्गिरस्वद्–ध्रुवा सीद ॥
राज्ञ्यसि प्राची दिग्–विराडसि दक्षिणा दिख् सम्राडसि प्रतीची
दिख्–स्वराडस्युदीची दिगधिपत्न्यसि बृहती दिगायुर्मे पाहि प्राणं
मे पाह्यपानं मे पाहि व्यानं मे पाहि चक्षुर्मे पाहि श्रोत्रं मे पाहि मनो
मे जिन्व वाचं मे पिन्वा ( ) ऽऽत्मानं मे पाहि ज्योतिर्मे यच्छ ॥ **12**

**<u>TS 4.3.6.2 - Padam</u>**

शन्तमेनेति शं – तमेन । तया । देवतया । अङ्गिरस्वत् । ध्रुवा ।
सीद ॥ राज्ञी । असि । प्राची । दिक् । विराडिति वि–राट् । असि ।

दक्षिणा । दिक् । सम्राडिति सं – राट् । असि । प्रतीची । दिक् ।
स्वराडिति स्व – राट् । असि । उदीची । दिक् ।
अधिपत्नीत्यधि–पत्नी । असि । बृहती । दिक् । आयुः । मे । पाहि ।
प्राणमिति प्र – अनम् । मे । पाहि । अपानमित्यप – अनम् । मे ।
पाहि । व्यानमिति वि – अनम् । मे । पाहि । चक्षुः । मे । पाहि ।
श्रोत्रम् । मे । पाहि । मनः । मे । जिन्व । वाचम् । मे । पिन्व ( ) ।
आत्मानम् । मे । पाहि । ज्योतिः । मे । यच्छ ॥ **12 (56)**

*(छर्दिषा – पिन्व – षट्च) (A6)*

**TS 4.3.7.1**

मा छन्दः प्रमा छन्दः प्रतिमा छन्दो ऽस्रीवि श्छन्दः पङ्क्ति श्छन्द
उष्णिहा छन्दो बृहती छन्दोऽनुष्टुप् छन्दो विराट् छन्दो गायत्री छन्द–
स्त्रिष्टुप् छन्दो जगती छन्दः पृथिवी छन्दो ऽन्तरिक्षं छन्दो द्यौ श्छन्दः
समा श्छन्दो नक्षत्राणि छन्दो मन श्छन्दो वाक् छन्दः कृषि श्छन्दो
हिरण्यं छन्दो गौ श्छन्दो ऽजा छन्दो ऽश्व श्छन्दः ॥

अग्निर्देवता – [ ] **13**

**TS 4.3.7.1 - Padam**

मा । छन्दः । प्रमेति प्र – मा । छन्दः । प्रतिमेति प्रति–मा । छन्दः । अस्रीविः । छन्दः । पङ्क्तिः । छन्दः । उष्णिहा । छन्दः । बृहती । छन्दः । अनुष्टुबित्यनु – स्तुप् । छन्दः । विराडिति वि – राट् । छन्दः । गायत्री । छन्दः । त्रिष्टुप् । छन्दः । जगती । छन्दः । पृथिवी । छन्दः । अन्तरिक्षम् । छन्दः । द्यौः । छन्दः । समाः । छन्दः । नक्षत्राणि । छन्दः । मनः । छन्दः । वाक् । छन्दः । कृषिः । छन्दः । हिरण्यम् । छन्दः । गौः । छन्दः । अजा । छन्दः । अश्वः । छन्दः ॥ अग्निः । देवता । **13 (50)**

**TS 4.3.7.2**

वातो देवता सूर्यो देवता चन्द्रमा देवता वसवो देवता रुद्रा देवता ऽऽदित्या देवता विश्वे देवा देवता मरुतो देवता बृहस्पति र्देवतेन्द्रो देवता वरुणो देवता मूर्द्धाऽसि राड् ध्रुवाऽसि धरुणा यन्त्र्यसि यमित्रीषे त्वोर्जे त्वा कृष्यै त्वा क्षेमाय त्वा यन्त्री राड् ध्रुवाऽसि धरणी धर्त्र्यसि धरित्र्यायुषे त्वा ( ) वर्चसे त्वौजसे त्वा बलाय त्वा ॥ **14**

**TS 4.3.7.2 - Padam**

वातः । देवता । सूर्यः । देवता । चन्द्रमाः । देवता । वसवः । देवता । रुद्राः । देवता । आदित्याः । देवता । विश्वे । देवाः । देवता । मरुतः । देवता । बृहस्पतिः । देवता । इन्द्रः । देवता । वरुणः । देवता । मूर्द्धा । असि । राट् । ध्रुवा । असि । धरुणा । यन्त्री । असि । यमित्री । इषे । त्वा । ऊर्जे । त्वा । कृष्यै । त्वा । क्षेमाय । त्वा । यन्त्री । राट् । ध्रुवा । असि । धरणी । धर्त्री । असि । धरित्री । आयुषे । त्वा ( ) । वर्चसे । त्वा । ओजसे । त्वा । बलाय । त्वा ॥ **14 (56)** *(देवता – ऽयुषे त्वा – षट् च ) (A7)*

**TS 4.3.8.1**

आशुस्त्रिवृद्–भान्तः पञ्चदशो व्योम सप्तदशः प्रतूर्ति–रष्टादश स्तपो नवदशो ऽभिवर्तः सवि॒ꣳशो धरुण एकवि॒ꣳशो वर्चो द्वावि॒ꣳशः संभरणस्त्रयोवि॒ꣳशो योनिश्चतुर्वि॒ꣳशो गर्भाः पञ्चवि॒ꣳश ओजस्त्रिणवः क्रतु–रेकत्रि॒ꣳशः

प्रतिष्ठा त्रयस्त्रि॒ꣳशो ब्र॒द्ध्नस्य॑ वि॒ष्टपं॑ चतुस्त्रि॒ꣳशो

नाकः॑ षट्त्रि॒ꣳशो वि॑व॒र्तो᳚ऽष्टाचत्वारि॒ꣳशो ध॒र्त्रश्च॒तुष्टो॒मः ॥ **15**

**TS 4.3.8.1 - Padam**

आ॒शुः । त्रि॒वृदिति॑ त्रि–वृत् । भा॒न्तः । प॒ञ्च॒द॒श इति॑ पञ्च–द॒शः ।

व्यो॑मेति॒ वि – ओ॒म॒ । स॒प्त॒द॒श इति॑ सप्त – द॒शः । प्र॒तू॑र्ति॒रिति॒

प्र–तू॒र्तिः॒ । अ॒ष्टा॒द॒श इत्य॑ष्टा–द॒शः । तपः॑ । न॒व॒द॒श इति॑ नव–द॒शः ।

अ॒भि॒व॒र्त इत्य॑भि – व॒र्तः । स॒वि॒ꣳ॒श इति॑ स – वि॒ꣳ॒शः । ध॒रुणः॑ ।

ए॒क॒वि॒ꣳ॒श इत्ये॑क – वि॒ꣳ॒शः । वर्चः॑ । द्वा॒वि॒ꣳ॒शः ।

सं॒भर॑ण॒ इति॑ सं – भर॑णः । त्र॒यो॒वि॒ꣳ॒श इति॑ त्रयः – वि॒ꣳ॒शः ।

योनिः॑ । च॒तु॒र्वि॒ꣳ॒श इति॑ चतुः – वि॒ꣳ॒शः । गर्भाः᳚ । प॒ञ्च॒वि॒ꣳ॒श

इति॑ पञ्च – वि॒ꣳ॒शः । ओजः॑ । त्रि॒ण॒व इति॑ त्रि – न॒वः । क्रतुः॑ ।

ए॒क॒त्रि॒ꣳ॒श इत्ये॑क – त्रि॒ꣳ॒शः । प्र॒ति॒ष्ठेति॑ प्रति – स्था ।

त्र॒य॒स्त्रि॒ꣳ॒श इति॑ त्रयः – त्रि॒ꣳ॒शः । ब्र॒द्ध्नस्य॑ । वि॒ष्टप᳚म् ।

च॒तु॒स्त्रि॒ꣳ॒श इति॑ चतुः – त्रि॒ꣳ॒शः । नाकः॑ ।

ष॒ट्त्रि॒ꣳ॒श इति॑ षट् – त्रि॒ꣳ॒शः । वि॒व॒र्त इति॑ वि – व॒र्तः ।

अष्टाचत्वारि॑ँ्श इत्यष्टा–चत्वारि॑ँ्शः । धर्त्रः ।

चतुष्टोम इति चतुः–स्तोमः ॥ **15 (37)**

*(आशुः – सप्तत्रि॑ँ्शत्) (A8)*

**TS 4.3.9.1**

अग्नेर्भागोऽसि दीक्षाया आधिपत्यं ब्रह्म स्पृतं त्रिवृथ् स्तोम इन्द्रस्य भागोऽसि विष्णोराधिपत्यं क्षत्र॑ँ स्पृतं पञ्चदशः स्तोमो नृचक्षसां भागोऽसि धातुराधिपत्यं जनित्र॑ँ स्पृत॑ँ् सप्तदशः स्तोमो मित्रस्य भागोऽसि वरुणस्याऽऽधिपत्यं दिवो वृष्टिर्वाताः स्पृता एकवि॑ँ्शः स्तोमो ऽदित्यै भागोऽसि पूष्ण आधिपत्यमोजः स्पृतं त्रिणवः स्तोमो वसूनां भागोऽसि– [ ] **16**

**TS 4.3.9.1 - Padam**

अग्नेः । भागः । असि । दीक्षायाः । आधिपत्यमित्याधि – पत्यम् । ब्रह्म । स्पृतम् । त्रिवृदिति त्रि – वृत् । स्तोमः । इन्द्रस्य । भागः । असि । विष्णोः । आधिपत्यमित्याधि – पत्यम् । क्षत्रम् । स्पृतम् । पञ्चदश इति पञ्च – दशः । स्तोमः ।

नृचक्षसामिति नृ – चक्षसाम् । भागः । असि । धातुः ।
आधिपत्यमित्याधि – पत्यम् । जनित्रम् । स्पृतम् । सप्तदश इति
सप्त – दशः । स्तोमः । मित्रस्य । भागः । असि । वरुणस्य ।
आधिपत्यमित्याधि – पत्यम् । दिवः । वृष्टिः । वाताः । स्पृताः ।
एकवि॒ꣳश इत्येक – वि॒ꣳशः । स्तोमः । अदित्यै । भागः । असि ।
पूष्णः । आधिपत्यमित्याधि – पत्यम् । ओजः । स्पृतम् । त्रिणव
इति त्रि – नवः । स्तोमः । वसूनाम् । भागः । असि । **16 (50)**

**TS 4.3.9.2**

रुद्राणामाधिपत्यं चतुष्पाथ् स्पृतं चतुर्वि॒ꣳशः स्तोम आदित्यानां
भागोऽसि मरुतामाधिपत्यं गर्भाः स्पृताः पञ्चवि॒ꣳशः स्तोमो देवस्य
सवितुर्भागोऽसि बृहस्पतेराधिपत्य॒ꣳ समीचीर्दिशः स्पृताश्चतुष्टोमः
स्तोमो यावानां भागोऽस्ययावानामाधिपत्यं प्रजाः स्पृता–श्चतु–
श्चत्वारि॒ꣳशः स्तोम ऋभूणां भागोऽसि विश्वेषां देवानामाधिपत्यं भूतं
निशान्त॒ꣳ स्पृतं त्रयस्त्रि॒ꣳशः स्तोमः ॥ **17**

**TS 4.3.9.2 - Padam**

रुद्राणाम् । आधिपत्यमित्याधि – पत्यम् । चतुष्पादिति चतुः–पात् ।
स्पृतम् । चतुर्वि॒ꣳश इति चतुः–वि॒ꣳशः । स्तोमः । आदित्यानाम् ।
भागः । असि । मरुताम् । आधिपत्यमित्याधि – पत्यम् । गर्भाः ।
स्पृताः । पञ्चवि॒ꣳश इति पञ्च – वि॒ꣳशः । स्तोमः । देवस्य ।
सवितुः । भागः । असि । बृहस्पतेः । आधिपत्यमित्याधि – पत्यम् ।
समीचीः । दिशः । स्पृताः । चतुष्टोम इति चतुः–स्तोमः । स्तोमः ।
यावानाम् । भागः । असि । अयावानाम् ।
आधिपत्यमित्याधि – पत्यम् । प्रजा इति प्र – जाः । स्पृताः ।
चतुश्चत्वारि॒ꣳश इति चतुः – चत्वारि॒ꣳशः । स्तोमः । ऋभूणाम् ।
भागः । असि । विश्वेषाम् । देवानाम् । आधिपत्यमित्याधि–पत्यम् ।
भूतम् । निशान्तमिति नि – शान्तम् । स्पृतम् ।
त्रयस्त्रि॒ꣳश इति त्रयः – त्रि॒ꣳशः । स्तोमः ॥ **17 (46)**

*(वसूनां भागोऽसि – षट्चत्वारि॒ꣳशच्च) (A9)*

**TS 4.3.10.1**

एकया ऽस्तुवत प्रजा अधीयन्त प्रजापतिरधिपतिरासीत् तिसृभिरस्तुवत

ब्रह्मासृज्यत ब्रह्मणस्पति-रधिपतिरासीत् पञ्चभिरस्तुवत

भूतान्यसृज्यन्त भूतानां पतिरधिपतिरासीथ् सप्तभिरस्तुवत

सप्तर्.षयो ऽसृज्यन्त धाता ऽधिपतिरासी-न्नवभिरस्तुवत पितरो-

ऽसृज्यन्ता-ऽ*दितिरधिपत्न्यासी-देकादशभि-रस्तुवतर्तवोऽ सृज्यन्ता-

ऽऽर्तवो-ऽधिपति-रासीत् त्रयोदशभि-रस्तुवत मासा असृज्यन्त

सँवथ्सरो ऽधिपति- [ ] **18**

**TS 4.3.10.1 - Padam**

एकया । अस्तुवत । प्रजा इति प्र - जाः । अधीयन्त ।

प्रजापतिरिति प्रजा - पतिः । अधिपतिरित्यधि - पतिः । आसीत् ।

तिसृभिरिति तिसृ - भिः । अस्तुवत । ब्रह्म । असृज्यत । ब्रह्मणः ।

पतिः । अधिपतिरित्यधि-पतिः । आसीत् । पञ्चभिरिति

पञ्च-भिः । अस्तुवत । भूतानि । असृज्यन्त । भूतानाम् । पतिः ।

अधिपतिरित्यधि - पतिः । आसीत् । सप्तभिरिति सप्त - भिः ।

अस्तुवत । सप्तर्.षय इति सप्त - ऋषयः । असृज्यन्त । धाता ।

अधिपतिरित्यधि – पतिः । आसीत् । नवभिरिति नव – भिः ।
अस्तुवत । पितरः । असृज्यन्त । अदितिः । अधिपत्नीत्यधि–पत्नी ।
आसीत् । एकादशभिरित्येकादश – भिः । अस्तुवत । ऋतवः ।
असृज्यन्त । आर्तवः । अधिपतिरित्यधि – पतिः । आसीत् ।
त्रयोदशभिरिति त्रयोदश – भिः । अस्तुवत । मासाः । असृज्यन्त ।
सँवथ्सर इति सं – वथ्सरः । अधिपतिरित्यधि – पतिः । **18 (50)**

**TS 4.3.10.2**

–रासीत् पञ्चदशभिरस्तुवत क्षत्रमसृज्यतेन्द्रो ऽधिपतिरासीथ्–
सप्तदशभिरस्तुवत पशवोऽसृज्यन्त बृहस्पतिरधिपति–
रासीन्नवदशभि–रस्तुवत शूद्रार्यावसृज्येता–महोरात्रे अधिपत्नी
आस्तामेकविꣳ शत्याऽस्तुवतैकशफाः पशवोऽसृज्यन्त
वरुणो ऽधिपतिरासीत् त्रयोविꣳशत्याऽस्तुवत क्षुद्राः पशवो ऽसृज्यन्त
पूषा ऽधिपतिरासीत् पञ्चविꣳशत्या ऽस्तुवता*ऽऽरण्याः पशवो ऽसृज्यन्त
वायुरधिपतिरासीथ् सप्तविꣳशत्याऽस्तुवत द्यावापृथिवी व्यै– [ ] **19**

**TS 4.3.10.2 - Padam**

आसीत् । पञ्चदशभिरिति पञ्चदश –भिः । अस्तुवत । क्षत्रम् ।
असृज्यत । इन्द्रः । अधिपतिरित्यधि – पतिः । आसीत् ।
सप्तदशभिरिति सप्तदश–भिः । अस्तुवत । पशवः । असृज्यन्त ।
बृहस्पतिः । अधिपतिरित्यधि – पतिः । आसीत् । नवदशभिरिति
नवदश –भिः । अस्तुवत । शूद्रार्याविति शूद्र – अर्यौ ।
असृज्येताम् । अहोरात्रे इत्यहः – रात्रे । अधिपत्नी इत्यधि– पत्नी ।
आस्ताम् । एकवि॒ꣳशत्येत्येक – वि॒ꣳशत्या । अस्तुवत ।
एकशफा इत्येक – शफाः । पशवः । असृज्यन्त । वरुणः ।
अधिपतिरित्यधि – पतिः । आसीत् । त्रयोवि॒ꣳशत्येति
त्रयः–वि॒ꣳशत्या । अस्तुवत । क्षुद्राः । पशवः । असृज्यन्त ।
पूषा । अधिपतिरित्यधि – पतिः । आसीत् । पञ्चवि॒ꣳशत्येति
पञ्च – वि॒ꣳशत्या । अस्तुवत । आरण्याः । पशवः । असृज्यन्त ।
वायुः । अधिपतिरित्यधि – पतिः । आसीत् ।

सप्तविꣳशत्येति सप्त – विꣳशत्या । अस्तुवत ।
द्यावापृथिवी इति द्यावा – पृथिवी । वीति । **19 (50)**

**TS 4.3.10.3**

–तां ँवसवो रुद्रा आदित्या अनु व्यायन् तेषामाधिपत्यमासी–
न्नवविꣳशत्या ऽस्तुवत वनस्पतयो ऽसृज्यन्त सोमो ऽधिपतिरासी–
देकत्रिꣳशता ऽस्तुवत प्रजा असृज्यन्त यावानां चायावानां
चाऽऽधिपत्यमासीत् त्रयस्त्रिꣳशता ऽस्तुवत भूतान्यशाम्यन् प्रजापतिः
परमेष्ठ्यधिपतिरासीत् ॥ **20**

**TS 4.3.10.3 - Padam**

एताम् । वसवः । रुद्राः । आदित्याः । अनु । वीति । आयन्न् ।
तेषाम् । आधिपत्यमित्याधि – पत्यम् । आसीत् । नवविꣳशत्येति
नव – विꣳशत्या । अस्तुवत । वनस्पतयः । असृज्यन्त । सोमः ।
अधिपतिरित्यधि – पतिः । आसीत् । एकत्रिꣳशतेत्येक–त्रिꣳशता ।
अस्तुवत । प्रजा इति प्र – जाः । असृज्यन्त । यावानाम् । च ।
अयावानाम् । च । आधिपत्यमित्याधि – पत्यम् । आसीत् ।

त्रयस्त्रि॑ꣳशतेति त्रयः॑–त्रि॒ꣳ॒शता॒ । अस्तु॑वत । भूता॑नि । अशाम्य॑न्न् ।

प्रजाप॑ति॑रिति प्रजा – पतिः॑ । परमेष्ठी । अधिप॑ति॒रित्यधि – पतिः॑ ।

आसी॒त् ॥ **20 (35)**

*(सँवथ्सरोऽधि॑पति– र्वि – पञ्च॑त्रिꣳशच्च) (A10)*

**TS 4.3.11.1**

इ॒यमे॒व सा या प्र॑थ॒मा व्यौच्छ॑द॒न्तर॒स्यां च॑रति॒ प्रवि॑ष्टा ।

व॒धूर्ज॑जान न॒वग॑ज्जनि॒त्री त्रय॑ एनां मह॒िमानः॑ सचन्ते ॥

छन्द॑स्वती उ॒षसा॒ पेपि॑शाने समा॒नं यो॒निमनु॑ स॒ञ्चर॑न्ती ।

सूर्य॑पत्नी॒ वि च॑रतः प्रजा॒नती॑ के॒तुं॑ कृण्वा॒ने अ॒ज॒रे॒ भूरि॑रेतसा ॥

ऋ॒त॒स्य॒ पन्था॒मनु॑ ति॒स्र आ ऽगु॒–स्त्रयो॑ घ॒र्मासो॒ अनु॒

ज्योति॒षा ऽऽ *गुः॑ ।

प्र॒जामे॒का र॒क्ष॒त्यू॒र्जमे॑का –[ ] **21**

**TS 4.3.11.1 - Padam**

इ॒यम् । ए॒व । सा । या । प्र॒थ॒मा । व्यौच्छ॒दिति॑ वि – औच्छ॑त् ।

अ॒न्तः । अ॒स्याम् । च॒र॒ति॒ । प्रवि॑ष्टे॒ति॒ प्र – वि॒ष्टा॒ ॥ व॒धूः । ज॒जा॒न॒ ।

न॒व॒गदि॑ति नव – गत् । जनि॑त्री । त्रयः॑ । ए॒ना॒म् । म॒हि॒मानः॑ ।

सचन्ते ॥ छन्दस्वती इति । उषसा । पेपिशाने इति । समानम् ।

योनिम् । अन्विति । सञ्चरन्ती इति सं – चरन्ती ॥ सूर्यपत्नी इति

सूर्य – पत्नी । वीति । चरतः । प्रजानती इति प्र–जानती । केतुम् ।

कृण्वाने इति । अजरे इति । भूरिरेतसेति भूरि – रेतसा ॥ ऋतस्य ।

पन्थाम् । अन्विति । तिस्रः । एति । अगुः । त्रयः । घर्मासः ।

अन्विति । ज्योतिषा । एति । अगुः ॥ प्रजामिति प्र – जाम् । एका ।

रक्षति । ऊर्जम् । एका । **21 (50)**

**<u>TS 4.3.11.2</u>**

व्रतमेका रक्षति देवयूनां ॥

चतुष्टोमो अभवद् या तुरीया यज्ञस्य पक्षा–वृषयो भवन्ती ।

गायत्रीं त्रिष्टुभं जगतीमनुष्टुभं बृहदर्कं युञ्जानाः सुवरा ऽभरन्निदं ॥

पञ्चभिर्धाता वि दधाविदं यत् तासा᳚ स्वसृरजनयत् पञ्चपञ्च ।

तासामु यन्ति प्रयवेण पञ्च नाना रूपाणि क्रतवो वसानाः ॥

त्रि᳚शथ् स्वसार उपयन्ति निष्कृत᳚ समानं केतुं प्रतिमुञ्चमानाः । **22**

**TS 4.3.11.2 - Padam**

व्रतम् । एका । रक्षति । देवयूनामिति देव - यूनाम् ॥ चतुष्टोम इति चतुः-स्तोमः । अभवत् । या । तुरीया । यज्ञस्य । पक्षौ । ऋषयः । भवन्ती ॥ गायत्रीम् । त्रिष्टुभम् । जगतीम् । अनुष्टुभमित्यनु-स्तुभम् । बृहत् । अर्कम् । युञ्जानाः । सुवः । एति । अभरन्न् । इदम् ॥ पञ्चभिरिति पञ्च - भिः । धाता । वीति । दधौ । इदम् । यत् । तासाम् । स्वसृः । अजनयत् । पञ्चपञ्चेति पञ्च - पञ्च ॥ तासाम् । उ । यन्ति । प्रयवेणेति प्र - यवेन । पञ्च । नाना । रूपाणि । क्रतवः । वसानाः ॥ त्रिꣳशत् । स्वसारः । उपेति । यन्ति । निष्कृतमिति निः - कृतम् । समानम् । केतुम् । प्रतिमुञ्चमाना इति प्रति - मुञ्चमानाः ॥ **22 (50)**

**TS 4.3.11.3**

ऋतूꣳस्तन्वते कवयः प्रजानतीर्मद्ध्येछन्दसः परि यन्ति भास्वतीः ॥ ज्योतिष्मती प्रति मुञ्चते नभो रात्री देवी सूर्यस्य व्रतानि । वि पश्यन्ति पशवो जायमाना नानारूपा मातुरस्या उपस्थे ॥ एकाष्टका तपसा तप्यमाना जजान गर्भं महिमानमिन्द्रं ।

तेन दस्यून् व्यसहन्त देवा हन्ताऽसुराणा-मभवच्छचीभिः ॥
अनानुजा-मनुजां मा-मकर्त सत्यं वँदन्त्यन्विच्छ एतत् ।
भूयास -[ ] 23

**TS 4.3.11.3 - Padam**

ऋतून् । तन्वते । कवयः । प्रजानतीरिति प्र - जानतीः ।
मद्ध्येछन्दस इति मद्ध्ये - छन्दसः । परीति । यन्ति । भास्वतीः ॥
ज्योतिष्मती । प्रतीति । मुञ्चते । नभः । रात्री । देवी । सूर्यस्य ।
व्रतानि ॥ वीति । पश्यन्ति । पशवः । जायमानाः । नानारूपा इति
नाना - रूपाः । मातुः । अस्याः । उपस्थ इत्युप - स्थे ॥
एकाष्टकेत्येक- अष्टका । तपसा । तप्यमाना । जजान । गर्भम् ।
महिमानम् । इन्द्रम् ॥ तेन । दस्यून् । वीति । असहन्त । देवाः ।
हन्ता । असुराणाम् । अभवत् । शचीभिरिति शचि - भिः ॥
अनानुजामित्यनानु - जाम् । अनुजामित्यनु-जाम् । माम् । अकर्त ।
सत्यम् । वदन्ती । अन्विति । इच्छे । एतत् ॥ भूयासम् । 23 (50)

**TS 4.3.11.4**

मस्य सुमतौ यथा यूयमन्या वो अन्या–मति मा प्र युक्त ॥
अभून्मम सुमतौ विश्ववेदा आष्ट प्रतिष्ठा–मविदद्धि गाधं ।
भूयासमस्य सुमतौ यथा यूयमन्या वो अन्या–मति मा प्र युक्त ॥
पञ्च व्युष्टीरनु पञ्च दोहा गां पञ्चनाम्नीमृतवोऽनु पञ्च ।
पञ्च दिशः पञ्चदशेन क्लृप्ताः समानमूर्द्ध्नी–रभि लोकमेकं ॥ 24

**TS 4.3.11.4 - Padam**

अस्य । सुमताविति सु – मतौ । यथा । यूयम् । अन्या । वः ।
अन्याम् । अतीति । मा । प्रेति । युक्त ॥ अभूत् । मम ।
सुमताविति सु – मतौ । विश्ववेदा इति विश्व – वेदाः । आष्ट ।
प्रतिष्ठामिति प्रति – स्थाम् । अविदत् । हि । गाधम् ॥ भूयासम् ।
अस्य । सुमताविति सु – मतौ । यथा । यूयम् । अन्या । वः ।
अन्याम् । अतीति । मा । प्रेति । युक्त ॥ पञ्च । व्युष्टीरिति
वि – उष्टीः । अन्विति । पञ्च । दोहाः । गाम् । पञ्चनाम्नीमिति
पञ्च – नाम्नीम् । ऋतवः । अन्विति । पञ्च ॥ पञ्च । दिशः ।

पञ्चदशेनेति पञ्च – दशेन । क्लृप्ताः । समानमूर्द्ध्नीरिति

समान – मूर्द्ध्नीः । अभीति । लोकम् । एकम् ॥ **24 (50)**

**TS 4.3.11.5**

ऋतस्य गर्भः प्रथमा व्यूषुष्यपामेका महिमानं बिभर्ति ।

सूर्यस्यैका चरति निष्कृतेषु घर्मस्यैका सवितैकां नि यच्छति ॥

या प्रथमा व्यौच्छथ् सा धेनुरभवद् यमे ।

सा नः पयस्वती धुक्ष्वोत्तरामुत्तरा(ग्ं) समां ॥

शुक्रर्.षभा नभसा ज्योतिषा ऽऽ *गाद्–विश्वरूपा शबलीरग्निकेतुः ।

समानमर्थ(ग्ग्ं) स्वपस्यमाना बिभ्रती जरामजर उष आऽगाः ॥

ऋतूनां पत्नी ( ) प्रथमेयमा ऽगादह्नां नेत्री जनित्री प्रजानां ।

एका सती बहुधोषो व्युच्छस्यजीर्णा त्वं जरयसि सर्वमन्यत् ॥ **25**

**TS 4.3.11.5 - Padam**

ऋतस्य । गर्भः । प्रथमा । व्यूषुषीति वि – ऊषुषी । अपाम् । एका ।

महिमानम् । बिभर्ति ॥ सूर्यस्य । एका । चरति । निष्कृतेष्विति

निः–कृतेषु । घर्मस्य । एका । सविता । एकाम् । नीति । यच्छति ॥

या । प्रथमा । व्यौच्छदिति वि - औच्छत् । सा । धेनुः । अभवत् ।
यमे ॥ सा । नः । पयस्वती । धुक्ष्व । उत्तरामुत्तरामित्युत्तरां-उत्तराम् ।
समाम् ॥ शुक्रर्.षभेति शुक्र - ऋषभा । नभसा । ज्योतिषा । एति ।
अगात् । विश्वरूपेति विश्व - रूपा । शबलीः ।
अग्निकेतुरित्यग्नि - केतुः ॥ समानम् । अर्थम् । स्वपस्यमानेति
सु-अपस्यमाना । बिभ्रती । जराम् । अजरे । उषः । एति । अगाः ॥
ऋतूनाम् । पत्नी ( ) । प्रथमा । इयम् । एति । अगात् । अह्नाम् ।
नेत्री । जनित्री । प्रजानामिति प्र - जानाम् ॥ एका । सती । बहुधेति
बहु - धा । उषः । वीति । उच्छसि । अजीर्णा । त्वम् । जरयसि ।
सर्वम् । अन्यत् ॥ **25 (69)** *(ऊर्जमेका - प्रतिमुञ्चमाना - भूयास - मेकं - पत्न्ये कान्न विꣳशतिश्च) (A11)*

**TS 4.3.12.1**

अग्ने जातान् प्र णुदा नः सपत्नान् प्रत्यजाताञ्जातवेदो नुदस्व ।
अस्मे दीदिहि सुमना अहेडन् तव स्याꣳ शर्मन् त्रिवरूथ उद्भित् ॥
सहसा जातान् प्र णुदा नः सपत्नान् प्रत्यजाताञ्जातवेदो नुदस्व ।

अधि नो ब्रूहि सुमनस्यमानो वय७ स्याम प्र णुदा नः सपत्नान् ॥
चतुश्चत्वारि७ँशः स्तोमो वर्चो द्रविण७ँ षोडशः स्तोम
ओजो द्रविणं पृथिव्याः पुरीषमस्य– [ ] **26**

**TS 4.3.12.1 - Padam**

अग्ने । जातान् । प्रेति । नुद । नः । सपत्नान् । प्रतीति । अजातान् । जातवेद इति जात – वेदः । नुदस्व ॥ अस्मे इति । दीदिहि । सुमना इति सु – मनाः । अहेडन्न् । तव । स्याम् । शर्मन्न् । त्रिवरूथ इति त्रि–वरूथः । उद्भिदित्युत् – भित् ॥ सहसा । जातान् । प्रेति । नुद । नः । सपत्नान् । प्रतीति । अजातान् । जातवेद इति जात – वेदः । नुदस्व ॥ अधीति । नः । ब्रूहि । सुमनस्यमान इति सु – मनस्यमानः । वयम् । स्याम । प्रेति । नुद । नः । सपत्नान् ॥ चतुश्चत्वारि७ँश इति चतुः – चत्वारि७ँशः । स्तोमः । वर्चः । द्रविणम् । षोडशः । स्तोमः । ओजः । द्रविणम् । पृथिव्याः । पुरीषम् । असि । **26 (50)**

**TS 4.3.12.2**

–फ्सो नाम ।

एव श्छन्दो वरिव श्छन्दः शंभू श्छन्दः परिभू श्छन्द

आच्छच्छन्दो मन श्छन्दो व्यच श्छन्दः सिन्धु श्छन्दः समुद्रं छन्दः

सलिलं छन्दः सँयच्छन्दो वियच्छन्दो बृहच्छन्दो रथन्तरं छन्दो

निकाय श्छन्दो विवध श्छन्दो गिर श्छन्दो भ्रज श्छन्दः सष्टुप् छन्दो

ऽनुष्टुप् छन्दः ककुच्छन्द स्त्रिककुच्छन्दः काव्यं छन्दो

–ऽङ्कुपं छन्दः – [ ] **27**

**TS 4.3.12.2 - Padam**

अफ्सः । नाम ॥ एवः । छन्दः । वरिवः । छन्दः । शंभूरिति

शं – भूः । छन्दः । परिभूरिति परि – भूः । छन्दः । आच्छत् ।

छन्दः । मनः । छन्दः । व्यचः । छन्दः । सिन्धुः । छन्दः । समुद्रम् ।

छन्दः । सलिलम् । छन्दः । सँयदिति सं – यत् । छन्दः । वियदिति

वि – यत् । छन्दः । बृहत् । छन्दः । रथन्तरमिति रथं – तरम् ।

छन्दः । निकाय इति नि – कायः । छन्दः । विवध इति वि–वधः ।

छन्दः । गिरः । छन्दः । भ्रजः । छन्दः । सष्टुबिति स – स्तुप् ।

छन्दः । अनुष्टुबित्यनु – स्तुप् । छन्दः । ककुत् । छन्दः ।

त्रिककुदिति त्रि – ककुत् । छन्दः । काव्यम् । छन्दः ।

अङ्कुपम् । छन्दः । **27 (50)**

**TS 4.3.12.3**

पदपङ्क्ति श्छन्दो ऽक्षरपङ्क्ति श्छन्दो विष्टारपङ्क्ति श्छन्दः

क्षुरो भृज्वाञ्छन्दः प्रच्छच्छन्दः पक्ष श्छन्द एव श्छन्दो

वरिव श्छन्दो वय श्छन्दो वयस्कृच्छन्दो विशालं छन्दो

विष्पर्द्धा श्छन्द श्छदि श्छन्दो दूरोहणं छन्दस्तन्द्रं

छन्दो ऽङ्काङ्कं छन्दः ॥ **28**

**TS 4.3.12.3 - Padam**

पदपङ्क्तिरिति पद – पङ्क्तिः । छन्दः । अक्षरपङ्क्तिरित्यक्षर – पङ्क्तिः ।

छन्दः । विष्टारपङ्क्तिरिति विष्टार – पङ्क्तिः । छन्दः । क्षुरः । भृज्वान् ।

छन्दः । प्रच्छत् । छन्दः । पक्षः । छन्दः । एवः । छन्दः । वरिवः ।

छन्दः । वयः । छन्दः । वयस्कृदिति वयः – कृत् । छन्दः ।

विशालमिति वि – शालम् । छन्दः । विष्पर्द्धा इति विः–स्पर्द्धाः ।

छन्दः । छदिः । छन्दः । दूरोहणमिति दुः – रोहणम् । छन्दः ।

तन्द्रम् । छन्दः । अङ्काङ्कम् । छन्दः ॥ **28 (33)**

**(अस्य – ङ्कुपञ्छन्द – स्त्रयस्त्रिꣳशच्च)** *(A12)*

**TS 4.3.13.1**

अग्निर्वृत्राणि जङ्घनद् द्रविणस्युर्विपन्यया ।

समिद्धः शुक्र आहुतः ॥

त्वꣳ सोमासि सत्पतिस्त्वꣳ राजोत वृत्रहा ।

त्वं भद्रो असि क्रतुः ॥

भद्रा ते अग्ने स्वनीक सन्दृग् घोरस्य सतो विषुणस्य चारुः ।

न यत् ते शोचि स्तमसा वरन्त न ध्वस्मानस्तनुवि रेप आ धुः ॥

भद्रं ते अग्ने सहसिन्ननीक–मुपाक आ रोचते सूर्यस्य ।

**TS 4.3.13.1 - Padam**

अग्निः । वृत्राणि । जङ्घनत् । द्रविणस्युः । विपन्ययेति

वि – पन्यया ॥ समिद्ध इति सम् – इद्धः । शुक्रः । आहुत

इत्या – हुतः ॥ त्वम् । सोम । असि । सत्पतिरिति सत् – पतिः ।

त्वम् । राजा । उत । वृत्रहेति वृत्र – हा ॥ त्वम् । भद्रः । असि ।
क्रतुः ॥ भद्रा । ते । अग्ने । स्वनीकेति सु – अनीक । सन्दृगेति
सं – दृक् । घोरस्य । सतः । विषुणस्य । चारुः ॥ न । यत् । ते ।
शोचिः । तमसा । वरन्त । न । ध्वस्मानः । तनुवि । रेपः । एति ।
धुः ॥ भद्रम् । ते । अग्ने । सहसिन्न् । अनीकम् । उपाके । एति ।
रोचते । सूर्यस्य ॥ **29 (50)**

**TS 4.3.13.2**

रुशद्–दृशे ददृशे नक्तया चिदरूक्षितं दृश आ रूपे अन्नं ॥
सैना ऽनीकेन सुविदत्रो अस्मे यष्टा देवाँ॒ आयजिष्ठः स्वस्ति ।
अदब्धो गोपा उत नः परस्पा अग्ने द्युमदुत रेवद् दिदीहि ॥
स्वस्ति नो दिवो अग्ने पृथिव्या विश्वायुर्द्धेहि यजथाय देव ।
यथ् सीमहि दिविजात प्रशस्तं तदस्मासु द्रविणं धेहि चित्रं ॥
यथा होतर्मनुषो – [ ] **30**

**TS 4.3.13.2 - Padam**

रुशत् । दृशे । ददृशे । नक्तया । चित् । अरूक्षितम् । दृशे । एति ।

रूपे । अन्नम् ॥ सः । एना । अनीकेन । सुविदत्र इति सु–विदत्रः ।

अस्मे इति । यष्टा । देवान् । आयजिष्ठ इत्या – यजिष्ठः । स्वस्ति ॥

अदब्धः । गोपा इति गो–पाः । उत । नः । परस्पा इति परः–पाः ।

अग्ने । द्युमदिति द्यु – मत् । उत । रेवत् । दिदीहि ॥ स्वस्ति । नः ।

दिवः । अग्ने । पृथिव्याः । विश्वायुरिति विश्व – आयुः । धेहि ।

यजथाय । देव ॥ यत् । सीमहि । दिविजातेति दिवि – जात ।

प्रशस्तमिति प्र – शस्तम् । तत् । अस्मासु । द्रविणम् । धेहि ।

चित्रम् ॥ यथा । होतः । मनुषः । **30 (50)**

**TS 4.3.13.3**

देवताता यज्ञेभिः सूनो सहसो यजासि ।

एवा नो अद्य समना समाना–नुश–न्नग्न उशतो यक्षि देवान् ॥

अग्निमीडे पुरोहितं यँज्ञस्य देवमृत्विजं ।

होतारꣳ रत्नधातमं ॥

वृषा सोम द्युमाꣳ असि वृषा देव वृषव्रतः ।

वृषा धर्माणि दधिषे ॥

सान्तपना इदꣳ हविर्मरुत–स्तज्जुजुष्टन ।

युष्माकोती रिशादसः ॥

यो नो मर्तो वसवो दुर्.हृणायु–स्तिरः सत्यानि मरुतो – [ ] **31**

**TS 4.3.13.3 - Padam**

देवतातेति देव – ताता । यज्ञेभिः । सूनो इति । सहसः । यजासि ॥

एवा । नः । अद्य । समना । समानान् । उशन्न् । अग्ने । उशतः ।

यक्षि । देवान् ॥ अग्निम् । ईडे । पुरोहितमिति पुरः – हितम् ।

यज्ञस्य । देवम् । ऋत्विजम् ॥ होतारम् । रत्नधातममिति

रत्न – धातमम् ॥ वृषा । सोम । द्युमानिति द्यु–मान् । असि । वृषा ।

देव । वृषव्रत इति वृष – व्रतः ॥ वृषा । धर्माणि । दधिषे ॥

सान्तपना इति सां – तपनाः । इदम् । हविः । मरुतः । तत् ।

जुजुष्टन ॥ युष्माक । ऊती । रिशादस इति रिश – अदसः ॥

यः । नः । मर्तः । वसवः । दुर्.हृणायुरिति दुः – हृणायुः । तिरः ।

सत्यानि । मरुतः । **31 (50)**

**TS 4.3.13.4**

जिघाꣳसात् ।

द्रुहः पाशं प्रति स मुचीष्ट तपिष्ठेन तपसा हन्तना तं ॥

सꣳवथ्सरीणा मरुतः स्वर्का उरुक्षयाः सगणा मानुषेषु ।

तेऽस्मत् पाशान् प्र मुञ्चन्त्वꣳहसः सान्तपना मदिरा मादयिष्णवः ॥

पिप्रीहि देवाꣳ उशतो यविष्ठ विद्वाꣳ ऋतूꣳर्. ऋतुपते यजेह ।

ये दैव्या ऋत्विज–स्तेभिरग्ने त्वꣳ होतॄणा–मस्यायजिष्ठः ॥

अग्ने यदद्य विशो अद्ध्वरस्य होतः पावक – [ ] **32**

**TS 4.3.13.4 - Padam**

जिघाꣳसात् ॥ द्रुहः । पाशम् । प्रतीति । सः । मुचीष्ट । तपिष्ठेन ।

तपसा । हन्तन । तम् ॥ सꣳवथ्सरीणा इति सं – वथ्सरीणाः ।

मरुतः । स्वर्का इति सु – अर्काः । उरुक्षया इत्युरु – क्षयाः ।

सगणा इति स – गणाः । मानुषेषु ॥ ते । अस्मत् । पाशान् । प्रेति ।

मुञ्चन्तु । अꣳहसः । सान्तपना इति सां – तपनाः । मदिराः ।

मादयिष्णवः ॥ पिप्रीहि । देवान् । उशतः । यविष्ठ । विद्वान् । ऋतून् ।

ऋतुपत इत्यृतु–पते । यज । इह ॥ ये । दैव्याः । ऋत्विजः । तेभिः ।

अग्ने । त्वम् । होतॄणाम् । असि । आयजिष्ठ इत्या – यजिष्ठः ॥

अग्ने । यत् । अद्य । विशः । अद्ध्वरस्य । होतः । पावक । **32 (50)**

**TS 4.3.13.5**

शोचे वेष्ट्वꣳ हि यज्वा ।

ऋता यजासि महिना वि यद्भूर्. हव्या वह यविष्ठ या ते अद्य ॥

अग्निना रयि–मश्ञवत् पोषमेव दिवेदिवे ।

यशसं ँवीरवत्तमं ॥

गयस्फानो अमीवहा वसुवित् पुष्टिवर्द्धनः ।

सुमित्रः सोम नो भव ॥

गृहमेधास आ गत मरुतो मा ऽप भूतन ।

प्रमुञ्चन्तो नो अꣳहसः ॥

पूर्वीभिर्. हि ददाशिम शरद्भिर्मरुतो वयं ।

महोभि– [ ] **33**

**TS 4.3.13.5 - Padam**

शोचे । वेः । त्वम् । हि । यज्वा ॥ ऋता । यजासि । महिना । वीति ।

यत् । भूः । हव्या । वह । यविष्ठ । या । ते । अद्य ॥ अग्निना ।

रयिम् । अश्ञवत् । पोषम् । एव । दिवेदिव इति दिवे - दिवे ॥

यशसम् । वीरवत्तममिति वीरवत् - तमम् ॥ गयस्फान इति

गय - स्फानः । अमीवहेत्यमीव - हा । वसुविदिति वसु - वित् ।

पुष्टिवर्द्धन इति पुष्टि - वर्द्धनः ॥ सुमित्र इति सु - मित्रः । सोम ।

नः । भव ॥ गृहमेधास इति गृह - मेधासः । एति । गत । मरुतः ।

मा । अपेति । भूतन ॥ प्रमुञ्चन्त इति प्र - मुञ्चन्तः । नः ।

अꣳहसः ॥ पूर्वीभिः । हि । ददाशिम । शरद्भिरिति शरत् - भिः ।

मरुतः । वयम् ॥ महोभिरिति महः - भिः । **33 (50)**

**TS 4.3.13.6**

-श्चर्.षणीनां ॥

प्र बुद्ध्निया ईरते वो महाꣳसि प्र णामानि प्रयज्यव स्तिरद्ध्वं ।

सहस्रियं दम्यं भागमेतं गृहमेधीयं मरुतो जुषद्ध्वं ॥

उप य-मेति युवतिः सुदक्षं दोषा वस्तोर्. हविष्मती घृताची ।

उप स्वैन–मरमतिर्वसूयुः ॥
इमो अग्ने वीततमानि हव्या ऽजस्रो वक्षि देवतातिमच्छ ।
प्रति न ईꣳ सुरभीणि वियन्तु ॥
क्रीडं वः शर्द्धो मारुत–मनर्वाणꣳ रथेशुभं । **34**

**TS 4.3.13.6 - Padam**

चर्.षणीनाम् ॥ प्रेति । बुद्ध्निया । ईरते । वः । महाꣳसि । प्रेति । नामानि । प्रयज्यव इति प्र – यज्यवः । तिरद्ध्वम् ॥ सहस्रियम् । दम्यम् । भागम् । एतम् । गृहमेधीयमिति गृह – मेधीयम् । मरुतः । जुषद्ध्वम् ॥ उपेति । यम् । एति । युवतिः । सुदक्षमिति सु–दक्षम् । दोषा । वस्तोः । हविष्मती । घृताची ॥ उपेति । स्वा । एनम् । अरमतिः । वसूयुरिति वसु – युः ॥ इमो इति । अग्ने । वीततमानीति वीत – तमानि । हव्या । अजस्रः । वक्षि । देवतातिमिति देव – तातिम् । अच्छ ॥ प्रतीति । नः । ईम् । सुरभीणि । वियन्तु ॥ क्रीडम् । वः । शर्द्धः । मारुतम् । अनर्वाणम् । रथेशुभमिति रथे – शुभम् ॥ **34 (50)**

**TS 4.3.13.7**

कण्वा अभि प्र गायत ॥

अत्यासो न ये मरुतः स्वञ्चो यक्षदृशो न शुभयन्त मर्याः ।

ते हर्म्येष्ठाः शिशवो न शुभ्रा वथ्सासो न प्रक्रीडिनः पयोधाः ॥

प्रैषा–मज्मेषु विथुरेव रेजते भूमिर्यामेषु यद्ध युञ्जते शुभे ।

ते क्रीडयो धुनयो भ्राजदृष्टयः स्वयं महित्वं पनयन्त धूतयः ॥

उपह्वरेषु यदचिद्ध्वं ँयियिं वय इव मरुतः केन – [ ] **35**

**TS 4.3.13.7 - Padam**

कण्वाः । अभि । प्रेति । गायत ॥ अत्यासः । न । ये । मरुतः ।

स्वञ्चः । यक्षदृश इति यक्ष – दृशः । न । शुभयन्त । मर्याः ॥ ते ।

हर्म्येष्ठा इति हर्म्ये–स्थाः । शिशवः । न । शुभ्राः । वथ्सासः । न ।

प्रक्रीडिन इति प्र – क्रीडिनः । पयोधा इति पयः – धाः ॥ प्रेति ।

एषाम् । अज्मेषु । विथुरा । इव । रेजते । भूमिः । यामेषु । यत् ।

ह । युञ्जते । शुभे ॥ ते । क्रीडयः । धुनयः ।

भ्राजदृष्टय इति भ्राजत् – ऋष्टयः । स्वयम् ।

महित्वमिति महि – त्वम् । पनयन्त । धूतयः ॥

उपह्वरेष्वित्युप–ह्वरेषु । यत् । अचिद्ध्वम् । ययिम् । वयः ।

इव । मरुतः । केन । **35 (50)**

**TS 4.3.13.8**

चित् पथा ।

श्चोतन्ति कोशा उप वो रथेष्वा घृत–**मुक्षता** मधुवर्ण–मर्चते ॥

अग्निमग्निꣳ हवीमभिः सदा हवन्त विश्पतिं ।

हव्यवाहं पुरुप्रियं ॥

तꣳ हि शश्वन्त ईडते स्रुचा देवं घृतश्चुता ।

अग्निꣳ हव्याय वोढवे ॥

इन्द्राग्नी रोचना दिवः श्ञथद् वृत्र–मिन्द्रं ँवो विश्वतस्परीन्द्रं नरो

विश्वकर्मन्. हविषा वावृधानो विश्वकर्मन्. हविषा वर्द्धनेन ॥ **36**

**TS 4.3.13.8 - Padam**

चित् । पथा ॥ श्चोतन्ति । कोशाः । उपेति । वः । रथेषु । एति ।

घृतम् । उक्षत । मधुवर्णमिति मधु – वर्णम् । अर्चते ॥

अग्निमग्निमित्यग्निम् – अग्निम् । हवीमभिरिति हवीम – भिः ।

सदा । हवन्त । विश्पतिम् ॥ हव्यवाहमिति हव्य – वाहम् ।
पुरुप्रियमिति पुरु – प्रियम् ॥ तम् । हि । शश्वन्तः । ईडते । स्रुचा ।
देवम् । घृतश्चुतेति घृत – श्चुता ॥ अग्निम् । हव्याय । वोढवे ॥
इन्द्राग्नी इतीन्द्र – अग्नी । रोचना । दिवः । श्ञथत् । वृत्रम् ।
इन्द्रम् । वः । विश्वतः । परीति । इन्द्रम् । नरः । विश्वकर्मन्निति
विश्व – कर्मन्न् । हविषा । वावृधानः । विश्वकर्मन्निति
विश्व – कर्मन्न् । हविषा । वर्द्धनेन ॥ **36 (46)**

*(सूर्यस्य – मनुषो – मरुतः – पावक – महोभी – रथेशुभ – ङ्केन – षड्चत्वारिꣳशच्च) (A13)*

====================

**Prasna Korvai with starting Padams of 1 to 13 Anuvaakams :-**

(अपान्त्वेम – न्नयं पुरो भुवः – प्राची – ध्रुवक्षिति – स्त्र्यवि – रिन्द्राग्नी – मा छन्द – आशुस्त्रिवृ – दग्नेर्भागो – ऽस्येक – येयमेव सा या – ऽग्ने जाता – नग्निर्वृत्राणि – त्रयोदश )

**Korvai with starting Padams of 1, 11, 21 Series of Panchaatis :-**

(अपान्त्वे – न्द्राग्नी – इयमेव – देवताता – षट्त्रिꣳशत् )

**First and Last Padam of Third Prasnam of Kandam 4 :-**

(अपान्त्वेमन् – हविषा वर्द्धनेन)

॥ हरिः ओं ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां पद पाठे

चतुर्थ काण्डे तृतीयः प्रश्नः समाप्तः ॥

---

**Details of Panchati and Padam for Kandam 4 , Prasanam 3 – (TS 4.3)**

| | Panchati | Padams |
|---|---|---|
| **Anuvakam 1** | **1** | **65** |
| **Anuvakam 2** | **3** | **130** |
| **Anuvakam 3** | **2** | **128** |
| **Anuvakam 4** | **3** | **167** |
| **Anuvakam 5** | **1** | **76** |
| **Anuvakam 6** | **2** | **106** |
| **Anuvakam 7** | **2** | **106** |
| **Anuvakam 8** | **1** | **37** |
| **Anuvakam 9** | **2** | **96** |
| **Anuvakam 10** | **3** | **`135** |
| **Anuvakam 11** | **5** | **269** |
| **Anuvakam 12** | **3** | **133** |
| **Anuvakam 13** | **8** | **396** |
| **Total →** | **36** | **1844** |

**Notes:**

1. **Please refer to the book "TS Kandam 1" and "TS 1.1 pada paadam with Vaakyam" for notes and conventions used in this Compilation.**
2. **Please download our vedic compilations from our web site www.vedavms.in**